गोपीचन्दन—नाममुद्रा—चरणचिन्हादि वैष्णवचिन्ह अनुकूलरूप हैं। तुलसीसेवा—परिक्रमा—प्रणामादि भी अनुकूलरूप हैं। गौ—अश्वत्थ—धात्री—ब्राह्मणादि का सन्मान उस भाव के अविरुद्ध उपकारक हैं। वैष्णवसेवा उक्त समस्त लक्षण विशिष्ट है। ये सब कर्त्तव्य रूप हैं। जिस प्रकार व्रजेश्वरी की पोष्य कृष्ण से पोषक रूप आवर्त्तितदुग्ध—दधी—नवनीतादि में अधिक अपेक्षा देखी गयी है। आप निजस्तन्यपायी- क्षुधातुर श्रीकृष्ण का परित्याग कर उन के दुग्ध उठाने के लिये गयी थीं। ठीक उसी प्रकार राग-मार्ग में अनुगमनकारी रसज्ञ भक्तों की पोष्यरूप श्रवण-कीर्त्तनादि से उस के पोषक इन सब में परम अपेक्षा रहनी चाहिये। अहंग्रह उपासना—न्यासमुद्रा—द्वारकाध्यान—महिषी पूजनादि अपकारक रूप हैं—इन का कर्त्तव्य उचित नहीं है। पुराणान्तर की कथा का श्रवणादि तटस्थ रूप से करना चाहिये। भक्ति सच्चिदानन्द स्वरूप निर्व्विकार वस्तु है। उपादानत्वादि रूप से उस का दुर्व्बोध कथन उसके सुखबोध के लिये जानना चाहिये। भक्तिशास्त्रों में—"स्नेहादि षड्भाव प्रेम के विलास रूप से कहे गये हैं। रसशास्त्रों में जिस प्रकार रस को विभावादि शब्द के द्वारा निर्देशित किया जाता है ठीक उसी प्रकार हम भी यहाँ उस प्रकार की भक्ति को उपादानादि शब्द के द्वारा व्यक्त करते हैं। अतः साधुगण क्षमा करें ॥ १४ ॥

द्वितीयः प्रकाशः

ननु—"न हानिं न ग्लानिं न निजगृहकृत्यं व्यसनितां ।
न घोरं नोद्घूर्णां न किल कदनं वेत्ति किमपि ।

बराङ्गीभिः स्वाङ्गीकृतसुहृदनङ्गाभिरभितो।
हरिर्वृन्दारण्ये परमनिशमुच्चैर्विहरति" ॥ इत्यादिभ्य एव श्रीवृन्दावनेश्वर्य्यादिप्रेमविलासमुग्धस्य श्रीव्रजेन्द्रसूनो र्न क्वापि अन्यत्रावधानप्रसंगसम्भव इत्यवसीयते। तथा सति नाना-दिग्देशवर्तिभिरनन्तरागानुगीयभक्तैः क्रियमाणं परिचर्य्यादिकं केन स्वीकर्त्तव्यम्? विज्ञप्ति स्तवपाठादिकञ्च केन श्रोतव्यम्? तदंशेन परमात्मनैवांशांशिनोरैक्यादितिचेत् समाधिरयं सम्यगाधिरेव तादृशकृष्णानुरागीभक्तानाम्। तर्हि का गतिः? साक्षात् श्रीमदुद्धवोक्तिरेव। साच यथा "मन्त्रेषु मां वाऽपहूय यत्त्वमकुण्ठताखण्डसदात्मबोधः। पृच्छेः प्रभो मुग्ध इवाप्रमत्तस्तन्मे मनोमोहयतीव देव॥" अस्यार्थः—मन्त्रेषु जरासन्धवधराजसूयाद्यर्थगमन-विचारादिषु प्रस्तुतेषु मां वै निश्चितम् उपहूय यत् पृच्छेः उद्धव त्वमत्र किं कर्त्तव्यं तद्ब्रूहि इति पृच्छेः अपृच्छः अकुण्ठतः कालादिना अखण्डः परिपूर्णः सदा सार्व्वदिक एव आत्मनो बोधः सम्बिच्छक्तिर्यस्य स मुग्ध इव यथा अन्यो मुग्धो जनः पृच्छति तथेत्यर्थः तत्तव युगपदेव मौग्ध्यं सार्व्वज्ञञ्च मोहयतीव मोहयतीव। अत्र मुग्ध इव त्वं न तु मुग्धः इति। मोहयतीव न तु मोहयति इति व्याख्यायां सङ्गत्यभावात्। असङ्गतेषु कर्म्माण्यनीहस्य भवोऽभवस्येत्यादिवाक्येषु मध्ये एतद्वाक्यस्योपन्यासो व्यर्थः स्यादित्यतस्तथा न व्याख्येयम्। ततश्च द्वारकालीलायां सत्यपि सार्व्वज्ञ्ये यथा मौग्ध्यं तथैव वृन्दावनलीलायामपि सत्यपि मौग्ध्ये सार्व्वज्ञ्यं तस्याचिन्त्यशक्तिसिद्धमेव मन्तव्यम्। अतएव वर्णितं श्रीलीलाशुकचरणैः "सर्व्वज्ञत्वे च मौग्ध्ये च सार्व्वभौममिदं मह इति ॥१॥

अच्छा? "श्रीकृष्ण, कन्दर्प को अपने सुहृत् रूप से अंगीकार करते हुए गोपसुन्दरियों के साथ बिहार कर रहे हैं। अर्थात् वे

निरन्तर गोपियों के साथ कामक्रीडा में रत हैं। जिसके कारण वे किसी हानि-ग्लानि—निजगृहकृतव्यसन, भय-भ्रम—यातनादि कुछ नहीं जान रहे हैं। क्यों कि आप निरन्तर श्री राधिका के साथ विलासमें मुग्ध हैं।" इत्यादि वचनोंसे श्रीराधिकाप्रेममें मुग्ध श्रीहरि के अन्य विषय में अवधान सम्भव पर नहीं है ऐसा स्थिर हो रहा है। यदि ऐसा ही है तो नानादेशीय असंख्य रागानुगीय भक्तों के द्वारा किये हुए परिचर्य्यादिक का स्वीकार किस प्रकार कर सकते हैं। उन का स्वीकार कौन कर सकता है? भक्तों के बिज्ञप्ति-स्तब पाठादि को कौन सुनता है? यदि कहो कि अंशरूप में विराजमान परमात्मा के द्वारा ही उसके श्रवणादि का समाधान हो सकता है। अंश-अंशि अभेद है। अंश के द्वारा अंशि का कार्य्य सिद्ध होता है।" यह सिद्धान्त उचित नहीं हैं। क्यों कि ऐसा होना समाधि क्रिया रूप से माना जा सकता है। कृष्णानुरागी—भक्त के निकट समाधी तो महान् व्याधि रूप से प्रतीयमान होती है। तब उसकी गति क्या है? कहते हैं—श्री उद्धव जी के वचन ही इस का समाधान हैं। उद्धवजी ने कहा—"प्रभो! आप सर्व्वदा अकुण्ठित अखण्ड आत्मबोध स्वरूप सम्बित् शक्ति के द्वारा परिपूर्ण हैं। आप का ज्ञान किसी भी प्रकार किसी काल में कुण्ठित नहीं होता है। आप सर्व्वदा अप्रमत्त अर्थात् किसी कार्य्य में आसक्त नहीं हैं। अतः मुग्ध न होकर भी जरासन्धवधादि के समय मुग्ध की भाँति मन्त्रणा करते हुए हमसे परामर्श पूछते हैं। आप के युगपद् अर्थात् एक ही समय मौजूद मौग्ध्य—तथा सार्वज्ञ्य हमें मोहित कर रहे हैं। यहाँ आप मुग्ध न होकर मुग्ध की भाँति इस प्रकार व्याख्या संगत है। मोहित करते नहीं हैं परन्तु मोहित की भाँति करते हैं यह व्याख्या संगत नहीं है। "कर्म्मरहित का कर्म्म, जन्मरहित का जन्म" इत्यादि वाक्य में

उक्त वाक्यों का उपन्यास व्यर्थ होता है। अतः शेषोक्तव्याख्या कर्त्तव्य नहीं है। इस लिये—द्वारकालीला में जिस प्रकार सर्व्वज्ञता रहने पर भी मुग्धता है ठीक उसी प्रकार बृन्दावनलीला में मौग्ध्यता रहने पर भी सार्वज्ञता है। भगवान् में युगपद् मौग्ध्यता—सार्व्वज्ञता ये उन की अचिन्त्यशक्ति के द्वारा सिद्ध होती है। श्रीलीलाशुक ने कहा है—"यह सार्व्वभौम ज्योति रूप भगवान श्रीकृष्ण में युगपद् सर्व्वज्ञता तथा मुग्धता मौजूद हैं॥ १॥"

अत्र सर्व्वज्ञात्वं महैश्वर्य्यमेव न तु माधुर्य्यं, माधुर्य्यं खलु तदेव यदैश्वर्य्यविनाभूतकेवलनरलीलत्वेन मौग्ध्यमिति स्थूलधियो ब्रूवते॥ २॥

"यहाँ सर्व्वज्ञता महान् ऐश्वर्य्य ही हैं, माधुर्य्य नहीं है, माधुर्य्य तो उस को कहते हैं कि ऐश्वर्य्य के बिना केवल मनुष्यलीला में मुग्धता है" इस प्रकार की व्याख्या मोटीबुद्धिवालों की ही जानना चाहिये॥ २॥

माधुर्य्यादिकं निरूप्यते। महैश्वर्य्यस्य द्योतने वाद्योतने च नरलीलत्वानतिक्रमो माधुर्य्यम्। यथा पूतनाप्राणहारित्वेऽपि स्तनचूषणलक्षणनरबाललीलत्वमेव। महाकठोरशकटस्फोठनेऽप्यतिसुकुमारचरणत्रैमासिक्योत्तानशायिबाललीलत्वम् महादीर्घदामाशक्यबन्धत्वेऽपि मातृभीतिवैक्लव्यम। ब्रह्मबलदेवादिमोहनेऽपि सर्व्वज्ञत्वेऽपि बत्सचारणलीलत्वम्। तथा ऐश्वर्य्यसत्व एव तस्याद्योतने दधिपयश्चौर्य्यं गोपस्त्रीलाम्पट्याादिकम्। ऐश्वर्य्यरहितकेवलनरलीलत्वेन मौग्ध्यमेव माधुर्य्यमित्युक्तेः क्रीडाचपलप्राकृतनरबालकेष्वपि मौग्ध्यं माधुर्य्यमिति तथा न निर्व्वाच्यम्।३

अब माधुर्य्यादि का निरूपण करते हैं—जहाँ ऐश्वर्य्य का प्रकाशन अथवा अप्रकाशन होने पर भी मनुष्यलीला का व्यतिक्रम नहीं

है वहाँ माधुर्य्य है। ऐश्वर्य्य मौजूद रहे अथवा नहीं रहे परन्तु जिसमें नरलीला का व्यतिक्रम नहीं घटता है वह माधुर्य्य है। जैसा कि—पूतना के प्राणहरण के समय स्तनपानरूप नरबालक भाव। इधर पूतना के प्राणहरण में चेष्टाशील हैं परन्तु उसी समय स्तनपान के लिये रोदन कर रहे हैं। महान् कठोर शकट के भञ्जन में तत्पर हैं परन्तु अतिकोमल चरणों से मनोहर, त्रमासिक शिशु की भांति उत्तानशायी हैं। महान् दीर्घ रज्जुओं के द्वारा वन्धजाने में असमर्थ हैं परन्तु ठीक उसी समय माता के भय से भयभीत-व्याकुल हैं। ब्रह्मा—बलदेवादि को मोहित करने में चतुर हैं परन्तु वत्सचारण में तत्पर हैं। ऐश्वर्य्य मौजूद है परन्तु उस का अप्रकाश है। उसी अवस्था में दधि-दुग्ध की चोरी तथा गोपस्त्रीजनों में लाम्पट्यता आदिक दिखने में आते हैं। ऐश्वर्य्य से रहित केवल मनुष्यलीला प्राप्त मुग्धता को माधुर्य्य नहीं कहा जाता है। क्यों कि क्रीडा में चपल प्राकृत मनुष्यबालक की जो स्वाभाविक मुग्धता है उस को माधुर्य्य नहीं कहा जाता। ऐश्वर्य्य मौजूद है उस का प्रकाश अथवा अप्रकाश है। प्रभु मनुष्यलीला में आकर प्राकृत मनुष्य की भाँति रोदन कर रहे हैं। वह उन का माधुर्य्यभाव है। ऐश्वर्य्य का स्वीकार नहीं करने पर माधुर्य्य नहीं बन सकता है तथा प्राकृत मनुष्यबालक में भी वह आ सकता है। परन्तु ऐसा तो नही है। प्राकृत नरबालक में माधुर्य्यभाव कहाँ आसकता है? भाव तो भगवान् की वस्तु है। वह अन्य किसी में नहीं है॥ ३॥

ऐश्वर्य्यन्तु नरलीलत्वस्यानपेक्षितत्वे सति ईश्वरत्वाविष्कारः। यथा मातापितरौ प्रति ऐश्वर्य्यं दर्शयित्वा—"एतद्वां दर्शितं रूपं प्राग्जन्मस्मरणाय मे। नान्यथा मद्भावं ज्ञानं मर्त्यलिङ्गेन जायते।" इत्युक्तम। यथा अर्ज्जनुं प्रति "पश्य मे रूपमैश्वर्य्यम"

इत्युक्त्वा ऐश्वर्य्यं दर्शितम्। व्रजेऽपि ब्रह्माणं प्रति मञ्जुमहिम-दर्शने परः सहस्रचतुर्भुजत्वादिकमपीति ॥ ४॥

नरलीला की अपेक्षा न करते हुए जो ईश्वरत्व का आविर्भाव है, वह ऐश्वर्य्य है। जैसा कि आपने माता-पिता के निकट चतुर्भुज के प्रकाश द्वारा उन्हें अपने ऐश्वर्य्य को दिखाकर "मनुष्य शरीर के द्वारा मद्विषयक ज्ञान नहीं होता है, पूर्व जन्मादि स्मरण करने के लिये पहले मैं अपने इस चतुर्भुज स्वरूप का दर्शन कराता हूँ" ऐसा उपदेश दिया है तथा अर्ज्जुन को "मेरे ईश्वर सम्बन्धी रूप का दर्शन करो" ऐसा कह कर अपने ऐश्वर्य्य का दर्शन कराया। व्रज में मञ्जुमहिमा प्रदर्शन के समय भी ब्रह्मा के हजारों चतुर्भुज स्वरूप का अवलोकन कराया ॥ ४॥

अथ भक्तिनिष्ठमैश्वर्य्यज्ञानम्। ईश्वरोऽयमित्यनुसन्धाने सति हृत्कम्पजनकसम्भ्रमेण स्वीयभावस्यातिशैथिल्यं यत् प्रतिपादयति तदैश्वर्य्यज्ञानम्। अतएव "युवां न नः सुतौ साक्षात् प्रधान-पुरुषेश्वरौ इत्यादि वसुदेवोक्तेः "सखेतिमत्वा प्रसभं यदुक्तम्" इत्यर्ज्जुनोक्तेश्च ईश्वरोऽयमित्यनुसन्धानेऽपि हृत्कम्पजनकसम्भ्रम-गन्धस्यानुद्गमात् स्वीयभावस्यातिस्थैर्य्यमेव यदुत्पादयति तन्मा-धुर्य्यज्ञानम्। यथा—"बन्दिनस्तमुपदेवगणा ये गीतवाद्यावलिभिः परिवव्रुः" इति "वन्द्यमानचरणः पथि वृद्धैः" इति च युगल-गीतोक्तेः गोष्ठं प्रति गवानयनसमये ब्रह्मेन्द्रनारदादिभिः कृतस्य कृष्णस्तुतिगीतवाद्यपूजोपहारप्रदानपूर्वकचरणबन्दनस्य दृष्टत्वेऽपि श्रीदाम-सुबलादीनां सख्यभावस्याशैथिल्यम्। तस्य तस्य श्रुत-त्वेऽपि व्रजाबलानां मधुरभावस्यशैथिल्यम्। तथैव व्रजराजकृत-तदाश्वासनवाक्यैर्व्रजेश्वर्य्या अपि नास्ति वात्सल्यशैथिल्यगन्धोऽपि प्रत्युत धन्यैवाहं यस्यायं मम पुत्रः परमेश्वर इति मनस्यामिनन्दने पुत्रभावस्य दार्ढ्यमेव। यथा प्राकृत्या अपि मातुः पुत्रस्य पृथ्वी-

श्वरत्वे सति तत्पुत्रभावः स्फीत एवावभाति। एवं धन्या एव वयं येषां सखा च परमेश्वर इति यासां प्रेयान् परमेश्वर इति सखानां प्रेयसीनाञ्च स्वस्वभावदाढ्यमेव ज्ञेयम्। किञ्च संयोगे सति ऐश्वर्य्यज्ञानं न सम्यगवभासते, संयोगस्य शैत्यात् चन्द्रातपतुल्यत्वात् विरहे त्वैश्वर्य्यज्ञानं सम्यगवभासते विरहस्यौष्ण्यात् सूर्य्यातपतुल्यत्वात्। तदपि हृत्कम्पसम्भ्रमाद्याभावान्नैश्वर्य्यज्ञानम्। यदुक्तम् 'मृगयुरिव कपीन्द्रं विव्यधे लुब्धधर्म्मा स्त्रियमकृत विरूपां स्त्रीजितः कामयानाम्। बलिमपि बलिमत्त्वा वेष्टयद्धाङ्क्षवद्य स्तदलमसितसख्यैर्दुस्त्यजस्तत्कथार्थः' इति। अत्र व्रजौकसां गोबर्द्धनधारणात् पूर्व्वं कृष्ण ईश्वर इति ज्ञानं नासीत्। गोबर्द्धनधारण वरुणलोकगमनानन्तरं तु कृष्णोऽयं ईश्वर एवेति ज्ञानेऽप्युक्तप्रकारेण-शुद्धं माधुर्य्यज्ञानमेव पूर्णम्। वरुणवाक्येनोद्धववाक्येन च साक्षादीश्वरज्ञानेऽपि "युवां न नः सुताविति वसुदेववाक्यवत् व्रजेश्वरस्य "न मे पुत्रः कृष्ण" इति मनस्यापि मनागपि नोक्तिः श्रूयते इति तस्माद् व्रजस्थानां सर्व्वथैव शुद्धमेव माधुर्य्यज्ञानं पूर्णं पुरस्थानां तु ऐश्वर्य्यज्ञानमिश्रं माधुर्य्यज्ञानं पूर्णम्॥ ५॥

अब भक्तनिष्ठ ऐश्वर्य्यज्ञान को दिखलाते हैं। ये ईश्वर हैं, इस प्रकार बुद्धि रहने पर जिसके द्वारा हृदयकम्पजनक सम्भ्रम के साथ हृदयवर्ती भाव की शिथिलता होती है उसको ऐश्वर्य्यज्ञान कहते हैं। "तुम दोनों हमारे पुत्र नहीं हो परन्तु साक्षात् ईश्वर प्रधानपुरुष हो" इत्यादि प्रकार की वसुदेव उक्ति देखने में आती है। "मैंने तुमको सखा जान हठात् जो कुछ कहा है"—यह अर्जुन का वचन भी है। ईश्वर ये हैं इस प्रकार बुद्धि होने पर भी यदि हृदय कम्पकारी सम्भ्रम का उदय नहीं होता है वह माधुर्य्यभाव है। इसमें भक्त हृदय-गत भाव शैथिल्य न होकर स्थिरता को प्राप्त होता है। "गन्धर्व्वादि उपदेवगण वाद्य-गीत-

पुष्पादि उपहार के द्वारा उनकी उपासना करते रहते हैं।" "मार्ग में ब्रह्मादि वृद्धगण इन के चरणों की वन्दना करते हैं" इन दोनों बचन के अनुसार अरण्य से गोष्ठ में प्रत्यागमन के समय ब्रह्मादि देवताओं के द्वारा श्रीकृष्ण को स्तब, गीत-वाद्यादि के साथ उपहार प्रदान, चरणवन्दनादि देखकर श्रीदाम-सुबलादि गोपबालकों के सख्यभाव का अशैथिल्य तथा उन सब बातों का श्रवण करके ब्रजरमणियों के मधुरभाव का अशैथिल्य देखने में आता है। उस प्रकार ब्रजराज के द्वारा आश्वासवाक्य बोले जाने पर भी ब्रजेश्वरी यशोदा के वात्सल्यभाव का गन्धमात्र शैथिल्य नहीं देखा गया है। वस्तुतः 'मैं धन्या हूँ, जिस से यह मेरा पुत्र परमेश्वर है" इस प्रकार आत्मश्लाघा के उदय से पुत्रभाव की दृढ़ता हो जाती है। जैसा कि प्राकृत में—पुत्र के राजा होने पर माता का पुत्रभाव शैथिल्य न होकर दृढ़ होता है ठीक उसी प्रकार ऐश्वर्यादि देख कर अथवा सुनकर ब्रजेश्वरी का पुत्रभाव दृढ़ होजाता है। हम सब धन्य हैं जिनके सखा परमेश्वर है।" इस प्रकार सखाओं का 'प्राणबल्लभ परमेश्वर हैं' इस प्रकार प्रेयसियों का भाव अपने-अपने भावानुसार दृढ़ता को प्राप्त होता है। और भी, संयोग के समय ऐश्वर्य्यज्ञान सम्यक् प्रकार से स्फुरित नहीं होता है। क्योंकि संयोग चन्द्रकिरण की भाँति शीतल वस्तु है। विरह के समय वह ऐश्वर्य्य सम्यक रूप से स्फुरित हो जाता है। और भी विरह के समय जो ऐश्वर्य्य का स्फुरण होता है उसे ऐश्वर्य्यज्ञान करके स्वीकार नहीं किया जाता है। क्योंकि उस अवस्था में हृदय-कम्पकारी सम्भ्रम अथवा आदरादि का अभाव रहता है। "हे भ्रमर ! श्रीकृष्ण के पूर्व्व-पूर्व्व जन्म की कथाओं का स्मरण करके हम अत्यन्त भीता हो रही हैं। उनकी क्रूरता का क्या वर्णन करेंगी। उनने रामावतार में व्याध की भाँति बालि को बध

किया था तथा स्त्री परवश होकर कामुकी सूर्पणखा के नाक-कान का छेदन भी किया। बामन अवतार में बलि के पूजोपहार लेकर कौआ की भाँति उसको बाँधा था। अतः उस कृष्णवर्ण पुरुष में सख्यता प्रयोजन नहीं है। तौ भी उनकी कथाओं की जो आलोचना करती हूँ उस का कारण यह है कि आलोचना के बिना नहीं रह सकती हूँ।" इन बचनों में श्रीराधिका का कोई सम्भ्रम अथवा आदर गौरव नहीं देखने में आता। गोबर्द्धनधारण के पहले ब्रजवासियों का कृष्ण में ईश्वरज्ञान नहीं रहा। गोवर्द्धनधारण तथा वरुणलोक गमन के उपरान्त उन की श्रीकृष्ण में ईश्वरबुद्धि हुई। परन्तु उस बुद्धि को ऐश्वर्य्यज्ञान नहीं कहा जा सकता है। वरुण के बचन तथा उद्धवजी के वचन से श्रीकृष्ण को साक्षात् ईश्वर करके जानने पर भी वसुदेव की भाँति ब्रजराज का पुत्रभाव ऐश्वर्यज्ञान से दूर नहीं हुआ। 'तुम हमारे पुत्र नहीं हो" इस प्रकार वसुदेव का वचन देखने में आता है। परन्तु ब्रजराज ने 'श्रीकृष्ण मेरा पुत्र नहीं है" इस प्रकार कभी नहीं कहा। अतः ब्रजवासियों का सर्व्वप्रकार से शुद्ध माधुर्य्यज्ञान तथा पुरवासियों का ऐश्वर्य्यज्ञान मिश्रित माधुर्य्यज्ञान पूर्णरूपतः सिद्ध हुआ ॥५॥

ननु पुरे बसुदेबनन्दनः कृष्णोऽयमहमीश्वर एव इति नरलीलत्वेऽपि जानात्येव यथा तथैब नन्दनन्दनः कृष्णः स्वमीश्वरत्वेन ब्रजे जानाति न बा? यदि जानाति तदा दामबन्धनादिलीलायां मातृभीतिहेतुकाश्रुपातादिकं न धटते। तदादिकमनुकरणमेबेति व्याख्या तु मन्दमतीनामेब न त्वभिज्ञभक्तानाम। तथा व्याख्यानस्याभिज्ञसम्मतत्बे "गोप्याददे त्वयि कृतागसि दाम यावद् या ते दशाश्रुकलिलाञ्जनसंभ्रमाक्षम्। बक्त्रं निनीय भयभावनया स्थितस्य सा मां बिमोहयति भीरपि यद्बिभेति "इत्युक्तबत्यां कुन्त्यां मोहो नैब बर्ण्येत। तथाहि भीरपि यद्बिभेति इत्युक्तैश्चात्र कुन्त्या

अत्रैश्वर्य्यज्ञानं व्यक्तीभूतं भयभावनया स्थितस्य इत्यन्तर्भयस्य च तथा सत्यत्वमेवाऽभिमतम्। अनुकरणमात्रत्वे ज्ञाते तस्या मोहो न सम्भवेदिति ज्ञेयम। यदि च स्वमीश्वरत्वेन न जानाति तदा तस्य नित्यज्ञानावरणं केन कृतमिति? अत्रोच्यते—यथा संसारबन्धे निपात्य दुःखमेवानुभावयितुं मायावृत्तिरविद्या जीवानां ज्ञानमावृणोति, यथा च महामधुर—श्रीकृष्णलीलासुखमनुभावयितु गुणातीतानां श्रीकृष्णपरिवाराणां व्रजेश्वर्य्यादीनां ज्ञानं चिच्छक्तिवृत्तिर्योगमायैवावृणोति, तथैव श्रीकृष्णमानन्दस्वरूपमप्यानन्दातिशयमनुभावयितुं चिच्छक्तिसारवृत्तिः प्रेमैव तस्य ज्ञानमावृणोति। प्रेम्णस्तु तत्स्वरूपशक्तित्वात् तेन तस्य व्याप्तेर्न दोषः। यथा ह्यविद्या स्वकृत्या ममतया जीवं दुःखयितुमेव बन्धनाति, यथा दण्डनीयजनस्य गात्रबन्धनं रज्जुनिगडादिना माननीयजनस्यापि गात्रबन्धनमनर्घसुगन्धसूक्ष्मकञ्चुकोष्णीषादिना, इत्यविद्याधीनो जीवो दुःखी प्रेमाधीनः कृष्णोऽति सुखी। कृष्णस्य प्रेमावरणरूप। सुखविशेषभोग एव मन्तव्यः, यथा भृङ्गस्य कमलकोषावरणरूपः। अतएवोक्तं "नापैषि नाथ हृदयाम्बुरुहात् स्वपुंसामिति प्रणयरसनया धृताङ्घ्रिपद्म इति च। किञ्च यथैवाविद्यया स्वतारतम्येन ज्ञानावरणतारतम्यात् जीवस्य पंचविधक्लेशतारतम्यं विधीयते, तथैव प्रेम्नापि स्वतारतम्येन ज्ञानैश्वर्य्याद्यावरणतारतम्यात् स्वविषयाश्रययोरनन्तप्रकारं सुखतारतम्यं विधीयते इति। तत्र श्रीयशोदानिष्ठः केवलप्रेमा स्वविषयाश्रयौ ममता रसनया निबध्य परस्परवशीभूतौ विधाय ज्ञानैश्वर्य्यादिकमावृत्य यथाधिकं सुखयति न तथा देवक्यादिनिष्ठो ज्ञानैश्वर्य्यमिश्र इति। तस्मात् तासां व्रजेश्वर्य्यादीनां सन्निधौ तद्वात्सल्यादिप्रेममुग्धः श्रीकृष्णः स्वमीश्वरत्वेन नैव जानाति। यत्तु नानादानवदावानलाद्युत्पातागमकाले तस्य सार्व्वज्ञ्यं दृष्टं तत्खलु तत्तत्प्रेमिपरिजनपालनप्रयोज-

निकया लीलाशक्त्यैव स्फोरितं ज्ञेयम् । किंच मौग्ध्यसमयेऽपि तस्य साधकभक्तपरिचर्य्यादिग्रहणे सार्व्वज्ञ्यमचिन्त्यशक्तिसिद्धम् इति प्राक्प्रतिपादितम । तदेवं बिधिमार्गरागमार्गयोर्बिवेक ऐश्वर्य्यमाधुर्य्ययोर्बिवेक ऐश्वर्य्यज्ञानमाधुर्य्यज्ञानयोर्बिवेकश्च दर्शितः । स्वकीयापरकीयात्वयोर्ब्बिवेकस्तु उज्ज्वलनीलमणिव्याख्यायां बिस्तारित एव । तत्र बिधिमार्गेण राधाकृष्णयोर्भजने महाबैकुण्ठस्थगोलोके खल्वबिबिक्तस्वकीयापरकीयाभावमैश्वर्य्यज्ञानं प्राप्नोति । मधुरभावलोभित्वे सति बिधिमार्गेण भजने द्वारकायां श्रीराधासत्यभामापरिकरत्वेन स्वकीयाभावमैश्वर्य्यज्ञानमिश्रमाधुर्य्यज्ञानं प्राप्नोति । रागमार्गेण भजने ब्रजभूमौ श्रीराधापरिकरत्वेन परकीयाभावं शुद्धमाधुर्य्यज्ञानं प्राप्नोति । यद्यपि श्रीराधिका श्रीकृष्णस्य स्वरूपभूता ल्हादिनी शक्तिः तस्या अपि श्रीकृष्णः स्वीय एव, तदपि तयोर्लीलासहितयोरेवोपास्यत्वं न तु लीलारहितयो; लीलायान्तु तयो ब्रजभूमौ काप्यार्षशास्त्रे दाम्पत्यं न प्रतिपादितमिति श्रीराधा हि प्रकटाप्रकटप्रकाशयोः परकीयैव इति सर्व्वार्थनिष्कर्षसंक्षेपः ॥ ६ ॥

अच्छा, जिस प्रकार वसुदेवनन्दन श्रीकृष्ण द्वारकापुरी में नरलीला करते हुए भी "हम ईश्वर हैं" इस प्रकार अपने को जानते थे क्या उस प्रकार नन्दनन्दन श्रीकृष्ण ब्रज में अपने को ईश्वर करके जानते थे, किम्बा नहीं ? यदि जानते थे ऐसा कहोगे तो दामबन्धनादि लीला में मातृ भय हेतुक अश्रुपातादि नहीं घट सकता है । वह सब अनुकरणमात्र है इस प्रकार की व्याख्या निर्वोध लोग ही किया करते हैं । अभिज्ञ भक्तों की इस प्रकार की व्याख्या अनुचित होती है । यदि इस प्रकार की व्याख्या अभिज्ञ सम्मत है ऐसा कहोगे तो "हे कृष्ण ! आपने जब दधि का बर्तन

तोड़ा था उस समय माता यशोदा आपको बाँधने के लिये रस्सी लेकर तत्परा हुई। उस समय माता के भय से आपकी जो अवस्था हुई थी वह अवस्था मेरे स्मरण पथ में आकर विमोहित कर रही है। उस समय माता को देख कर आपके दोनों नेत्र भय से व्याकुल तथा काजर से मिश्रित अश्रु धारा से व्याप्त हो गये। भय तो आपसे भीत होकर भागता है। आप इस प्रकार होते हुए भी यशोदा के भय से भीत होकर काँपते थे।" इस प्रकार कुन्तीदेवी के वचन में मोहरूप वर्णन नहीं होता। "जिन के भय से भयभीत होकर" इस वचन से कुन्ती का ऐश्वर्य्यज्ञान स्पष्ट है। फिर "उस भय भावना से भीत होकर" इस वचन से कृष्ण के आन्तरिक भय सत्य है ऐसा कुन्ती का अभिमत है। यदि "यह अनुकरण मात्र है" ऐसा कुन्ती का बोध होता तो उसकी मोहसम्भावना नहीं होती। यदि कहो कि ब्रज में श्रीकृष्ण अपने को ईश्वर करके नही जानते थे तो नित्यज्ञानानन्दघन उन के नित्यज्ञान का आवरण किसने किया? उस का उत्तर यह है—जिस प्रकार संसारबन्धन में डालकर दुःखानुभव कराने के लिये मायावृत्ति अविद्या जीवों के ज्ञान को आवरित करती है, उसी प्रकार महामधुर श्रीकृष्णलीला का सुख आस्वादन कराने के लिये उनके गुणातीत परिवार ब्रजेश्वरी आदि के ज्ञान को चिच्छक्तिवृत्ति योगमाया आवृत कर देती है, तथा आनन्द स्वरूप श्रीकृष्ण को भी अतिशय आनन्द का अनुभव कराने के लिये ही उन के ज्ञान को भी उसी योगमाया चिच्छक्ति की सारवृत्ति प्रेम ही आवृत कर देती है। प्रेम उन की स्वरूपशक्ति की ही वृत्ति है, अतः उस के द्वारा उन की व्याप्ति कोई दोषावह बात नहीं है। जिस प्रकार अविद्या निजवृत्ति ममता के द्वारा जीव को दुःख देने के लिये बाँधती है, जिस प्रकार दण्डनीय व्यक्ति के शरीर का बन्धन रज्जु अथवा साँकल के द्वारा

किया जाता है, तथा जैसा कि माननीय व्यक्ति के शरीरबन्धन सुगन्ध-सूक्ष्म कंचुक अथवा पगड़ी के द्वारा देखा जाता है। उभय प्रकार के अविद्याधीन जीव दुःखी तथा प्रेमाधीन श्रीकृष्ण अति सुखी हैं। प्रेमाधीन श्रीकृष्ण के उस प्रकार का बन्धन देखने में आता है परन्तु वह बन्धन दुःख रूप न होकर परम सुख का प्रदान करता है। श्रीकृष्ण को प्रेम के द्वारा आवृत्त हो जाना सुख-विशेष भोग के लिये है, ऐसा जानना चाहिये। जैसा कि भ्रमर का कमलकोष में आवरण होता है ठीक उसी प्रकार है। अतः शास्त्र में कहा है—"हे नाथ आप भक्तों के हृदयकमल से बाहिर नहीं होते हैं" "जीव प्रणयरज्जु के द्वारा आप के पाद पद्म को बाँध लेता है।" और भी जैसा कि अविद्या निजतारतम्य अर्थात् अल्प-अधिकादिक भेद के द्वारा जीव के ज्ञानावरण को अल्प-अधिक तारतम्य से करती है जिससे पाँच प्रकार के क्लेश उत्पन्न होते हैं ठीक उसी प्रकार प्रेम भी अपने तारतम्य के अनुसार ज्ञान-ऐश्वरादि के आवरण को तारतम्य रूप से करता है। जिससे निज विषय कृष्ण एवं निज आश्रय गोपी आदिकों को अनन्त प्रकार से सुख भोग कराता रहता है। उन में से यशोदादि व्रजपरिकरनिष्ठ विशुद्ध प्रेम जिस प्रकार अपने विषय तया आश्रय को ममतारज्जु के द्वारा बाँधकर परस्पर को परस्पर के अधीन कर दोनों के ज्ञान-ऐश्वर्य्य को आवरित करके अत्यधिक सुख प्रदान करता है, ज्ञान-ऐश्वर्य्य से मिश्रित देवकी आदि पुरवासीनिष्ठ का प्रेम उस प्रकार सुख प्रदान नहीं करता है। अतः उन व्रजेश्वरी आदिक के निकट उनके वात्सल्यादि प्रेम से मुग्ध श्रीकृष्ण अपने को ईश्वर करके नहीं जानते हैं। दानव-दावानलादि उत्पात के समय श्रीकृष्ण की जो सर्व्वज्ञता देखने में आती है वह निश्चय उन सब प्रेमीपरिजन के पालन प्रयोजन-रूपिणी लीलाशक्ति के

द्वारा उद्भावित हुई है, ऐसा जानना चाहिये । और भी, मुग्ध हो जाने के समय में भी श्रीकृष्ण के साधकभक्तों के परिचर्य्यादि ग्रहण में जो सर्व्वज्ञता देखने में आती है वह अचिन्त्यशक्ति के द्वारा समाधित होती है, यह पहिले प्रतिपादित किया गया है। इस प्रकार विधिमार्ग-रागमार्ग का विवेक, ऐश्वर्य्य-माधुर्य्य का विवेक, ऐश्वर्य्यज्ञान-माधुर्य्यज्ञान का विवेक दिखलाया गया है। स्वकीया-परकीया का विवेक उज्ज्वलनीलमणि ग्रन्थ की व्याख्या में विस्तारित किया गया है। अब हम यह कहते हैं कि—विधिमार्ग के द्वारा राधाकृष्ण का भजन करने पर महावैकुण्ठस्थ गोलोक में स्वकीया-परकीया भेद भाव से वर्जित ऐश्वर्य्यज्ञान की प्राप्ति होती है। और यदि मधुरभाव में लोभ है अथच विधिमार्ग से भजन किया जाता है तो द्वारका में राधा-सत्यभामा के ऐक्य के कारण सत्यभामापरिकर रूप से ऐश्वर्य्यज्ञानमिश्रित माधुर्य्यज्ञान का लाभ होता है। केवल रागमार्ग से भजन करने पर ब्रज में श्रीराधिकापरिवार रूप में शुद्धमाधुर्य्यज्ञान की प्राप्ति होती है। यद्यपि श्रीराधिका श्रीकृष्ण की स्वरूपभूता ह्लादिनी शक्तिरूपा हैं तथा श्रीकृष्ण राधिका के स्वकीय हैं तो भी दोनों की लीला के साथ उपासना होती है कभी लीला रहित रूप में उपासना नहीं है। लीलावस्था में ब्रजभूमि में किसी भी आर्षशास्त्र में दोनों का दाम्पत्य प्रतिपादन नहीं किया गया है। अतः श्रीराधिका के प्रकट-अप्रकट दोनों प्रकाश में परकीयत्व है यह निश्चित है ॥६॥

अथ रागानुगाभक्तिमज्जनस्यानर्थनिवृत्तिनिष्ठारुच्याशक्त्यनन्तरं प्रेमभूमिकारूढ़स्य साक्षात्स्वाभीष्टप्राप्तिप्रकारः प्रदर्श्यते। यथोज्ज्वलनीलमणौ "तद्भावबद्धरागा ये जनास्ते साधने रताः। तद्योग्यमनुरागौघं प्राप्योत्कण्ठानुसारतः। ता एकशोऽथवा द्वित्राः काले काले ब्रजेऽभवन्" इति। अनुरागौघं रागानुगाभजनौत्कण्ठ्यं

न त्वनुरागस्थायिनं साधकदेहेऽनुरागोत्पत्त्यसम्भवात्। व्रजेऽभवन्निति अवतारसमये नित्यप्रियाद्या यथा आविर्भवन्ति तथैव गोपिकागर्भे साधनसिद्धा अपि आविर्भवन्ति। ततश्च नित्यसिद्धादिगोपीनां महाभाववतीनां सङ्गमहिम्ना दर्शन-श्रवण-कीर्त्तनादिभिः स्नेह-मान-प्रणय-रागानुरागमहाभावा अपि तत्र गोपिकादेहे उत्पाद्यन्ते। पूर्व्वजन्मनि साधकदेहे तेषामुत्पत्त्यसम्भवात्। अत एव व्रजे कृष्णप्रेयसीनामसाधारणानि। यदुक्तम्—"गोपीनां परमानन्द आसीद्गोविन्ददर्शने। क्षणं युगशतमिव यासां येन विना भवेदिति" "त्रुटि युगायते त्वामपश्यतामि" त्यादि च। क्षणस्य युगशतायमानत्वं महाभावलक्षणम्। ननु प्रेमभूमिकाधिरूढस्य साधकस्य देहभङ्गे सत्येवाप्रकटप्रकाशे गोपीगर्भाज्जन्मना बिना एव गोपिकादेहप्राप्तौ सत्यां तत्रैव नित्यसिद्धगोपिकासङ्गोद्भूतानां स्नेहादीनां भावानां प्राप्तिः स्यादित्येवं किं न ब्रूवे? नैवम्। गोपीगर्भाज्जन्मना बिना इयं सखी कस्याः पुत्री कस्य वधूः कस्य स्त्री इत्यादिनरलीलताव्यवहारो न सिद्ध्येत्। तर्हि प्रकट प्रकाश एव जन्मास्तीति चेन्नैवं, प्रपञ्चागोचरस्य वृन्दावनीयप्रकाशस्य साधकानां प्रापञ्चिकलोकानाञ्च प्रवेशादर्शनेन सिद्धानामेव प्रवेशदर्शनेन ज्ञापितात् केवलसिद्धभूमित्वात् स्नेहादयो भावास्तत्र स्वस्वसाधनैरपि तूर्णं न फलन्ति, अतो योगमायया जातप्रेमाणो भक्तास्ते प्रपञ्चगोचरे वृन्दावनप्रकाशे एव श्रीकृष्णावतारसमये नीयन्ते। तत्रोत्पत्त्यनन्तरं श्रीकृष्णाङ्गसङ्गात् पूर्व्वमेव तत्तद्भावसिद्ध्यर्थं तत्र साधकभक्तानां रुक्मिप्रभृतीनां सिद्धभक्तानाञ्च प्रवेशदर्शनेनैवानुभूयते साधकभूमित्वं सिद्धभूमित्वञ्च। ननु तर्हि तावन्तं कालं तैः परमोत्कण्ठभक्तैः क्व स्थातव्यम्? तत्रोच्यते। साधकदेहभङ्गसमये एव तस्मै प्रेमवते भक्ताय चिरसमयविधृतसाक्षात्सेवाभिलाषमहोत्कण्ठाय भगवता कृपयैव सपार-

करस्य स्वस्य दर्शनं तदभिलषणीयसेवादिकं चालब्धस्नेहादिप्रेम-
भेदापि सुकृढीयते एव यथा नारदायैव चिदानन्दमयो गोपिका-
तनुश्च दीयते । सैव तनुर्योगमायया बृन्दाबनीयप्रकटप्रकाशे
कृष्णपरिवारप्रादुर्भावसमये गोपीगर्भादुद्भाव्यते । नात्र काल-
बिलम्बगन्धोऽपि। प्रकटलीलाया अपि विच्छेदाभाबात्। यस्मि-
न्नेब ब्रह्माण्डे तदानीं बृन्दाबनीयलीलानां प्राकट्यं तत्रैवास्यामेव
ब्रजभूमौ, अतः साधकप्रेमिभक्तदेहभङ्गसमकालेऽपि सपरिकर-
श्रीकृष्णप्रादुर्भावः सदैवास्ति इति भो भो महानुरागिसोत्कण्ठ-
भक्ता माभैष्ट सुस्थिरास्तिष्ठत स्वस्त्येबास्तु भवद्भ्य इति ॥ ७ ॥

अनन्तर, रागानुगाभक्ति वाले भक्त के अनर्थनिवृत्ति-निष्ठा-रुचि-
आसक्ति के पश्चात् प्रेमभूमिका में आरोहण हो जाने पर साक्षात्
रूप से जिस प्रकार उसे निज-अभीष्ट की प्राप्ति होती है उस का
वर्णन करते हैं। उज्ज्वलनीलमणि ग्रन्थ में कहा गया है—"जो
ब्रजभाव में वद्धराग होकर रागमार्ग के अनुसार भजन परायण
हैं वे तद्योग्य अनुराग समूह को प्राप्त होकर उत्कण्ठा के अनु-
सार अकेला किम्वा दो-तीन मिल कर यथा समय ब्रजभूमि में
गोपी होकर जन्म लेते हैं।" यहाँ अनुराग समूह का अर्थ—
रागानुगाभजनविषयिणी उत्कण्ठा परम्परा है। अनुराग शब्द से
स्थायिभाव रूप अनुराग नहीं है। क्यों कि साधक शरीर में उस
का अत्यन्त अभाव है। "ब्रजभूमि में गोपी रूप से जन्म लाभ"
बोलने पर अवतार के समय नित्यसिद्धा गोपियों की भाँति गोपी
गर्भ में आविर्भाव है। पश्चात् महाभाववती नित्यसिद्धगोपियों
की सङ्गमहिमा से दर्शन-श्रवण-कीर्त्तनादि के द्वारा उस गोपिका-
देह में स्नेह-मान-प्रणय-राग-अनुराग-महाभाव उत्पन्न होते हैं।
गोपीजन्म के पहले साधक शरीर में प्रेम के अतिरिक्त उनकी
उत्पत्ति असम्भव है। अतः ब्रज में श्रीकृष्णप्रेयसियों में सब

असाधारण लक्षण मौजूद हैं, ऐसा जानना चाहिये। श्रीभागवत में कहा है-"गोबिन्द दर्शन से गोपियों का परमानन्द होता है और अदर्शन में एक-एक क्षण उन के लिये सौ-सौ युग की भांति बोध होता है।" "आपको न देखकर एक ही मुहूर्त्त युग की भांति हो जाता है।" क्षणकाल का युगशत की भांति प्रतीत हो जाना यह महाभाव का लक्षण है। अच्छा! "प्रेमभूमिका में आरूढ़ साधक के शरीर नाश के उपरान्त गोपीगर्भ में जन्म के बिना ही अप्रकट प्रकाश में गोपीदेह की प्राप्ति होवे। उस गोपीदेह में नित्यसिद्ध गोपियों के प्रभाव से स्नेहादि भावों की प्राप्ति हो सकती है" ऐसा सिद्धान्त क्यों नहीं करते हो? उस के उत्तर में कहते हैं—तुम इस प्रकार नहीं कह सकते। क्यों कि गोपीगर्भ में जन्म के बिना "वह किस की कन्या, किस की वधू, किस की पत्नी" इत्यादि नरलीला का व्यवहार सिद्ध नहीं हो सकता है। अच्छा! अप्रकटप्रकाश में भी गोपीगर्भ में जन्म हो सकता है यदि यों कहें तो यह भी सङ्गत नहीं है। क्योंकि प्रपञ्च के अगोचर बृन्दावन के प्रकाश ही में अप्रकटलीलास्थल है। साधकों का किम्वा प्रापञ्चिकलोगों का उस में प्रवेश देखने में नहीं आता। केवल सिद्धगण वहाँ प्रवेश करते हैं तथा उस को सिद्ध-भूमि भी कहते हैं। वहाँ साधन करने पर भी स्नेहादि भाव समूह शीघ्र लाभ नहीं होते। अतः जातप्रेम भक्त अर्थात् जिन को प्रेम उत्पन्न हो गया है ऐसे भक्तगण ही योगमाया के द्वारा प्रपञ्च-गोचर बृन्दाबन प्रकाशकाल में श्रीकृष्णावतार के साथ लिये जाते हैं। इस प्रकार वहाँ उत्पत्ति के पश्चात् तथा श्रीकृष्ण के अङ्गसङ्ग के पहले वे सब भाव सिद्ध होते हैं। उस भावसिद्ध के लिये कर्म्मी आदिक साधकभक्तों का तथा सिद्धभक्तों का प्रवेश देखने में आता है। अतः प्रकटप्रकाश को साधनभूमि रूप तथा

अप्रकटप्रकाश को सिद्धभूमि रूप में अनुमान किया जाता है। अच्छा! प्रकट प्रकाश तो कदाचित् ही होता है। तब तक अनुरागीभक्त कहाँ ठहरता है? उत्तर में कहते हैं—प्रेमप्राप्त, बहुकाल से साक्षात् सेवा प्राप्ति करने के लिये महान् उत्कण्ठित उस भक्त के शरीर भङ्ग हो जाने पर भगवान अपनी कृपा के द्वारा परिवारवर्ग के साथ अपने दर्शन, तथा उसकी अभिलाषणीय सेवादि को एक बार प्रदान करते हैं। किन्तु उस समय स्नेहादिभाव का उदय नहीं होता। देवर्षि नारद जी उस का दृष्टान्त हैं। उस समय भगवान उस भक्त को गोपीदेह भी दान करते हैं। जिस ब्रह्माण्ड में उस समय वृन्दावनीय लीलाओं का प्राकट्य हो रहा है उसी ब्रजभूमि में किम्वा यहाँ की ब्रजभूमि में श्रीकृष्ण किम्वा उनके परिवारों के प्रादुर्भाव के समय गोपीगर्भ से वह प्रादुर्भावित होता है। योगमाया के द्वारा उस का समाधान होता है। अतः साधक-प्रेमीभक्त के देहभङ्ग समय में भी सपरिकर श्रीकृष्ण का प्रादुर्भाव मौजूद है ऐसा जानना चाहिये। क्योंकि उन के जन्मादिक समस्त लीला नित्य हैं अर्थात् अभी भी वह किसी ब्रह्माण्ड में हो रही हैं। अतः महानुरागी उत्कण्ठित भक्तगण! भय मत कीजिये। धैर्य्य रखिये। आप सब का मङ्गल ही होगा॥ ७॥

"लीलाबिलासिने भक्तिमञ्जरीलोलुपालिने।
मौग्ध्यसार्व्वज्ञ्यनिलये गोकुलानन्द ते नमः॥
ददामि बुद्धियोगं तं येन मामुपयान्ति ते।
इत्यवोचः प्रभो तस्मादेतदेवाहमर्थये॥
गोपीकुचालंकृतस्य तव गोपेन्द्रनन्दन!।
दास्यं यथा भवेदेवं बुद्धियोगं प्रयच्छ मे॥

ये तु रागानुगा भक्तिः सर्व्वथैव सर्व्वदैव शास्त्रबिधिमतिक्रान्ता एव इति ब्रूवते "ये शास्त्रविधिमुत्सृज्य यजन्ते श्रद्धयान्विताः"

इति "विधिहीनमसृष्टान्नम" इत्यादि गीतोक्तो गर्हामर्हन्तो मुहुरुत्पातमनुभूतवन्तोऽनुभवन्तोऽनुभविष्यन्ति चेत्यलमातिविस्तरेण ।

हन्त रागानुगावर्त्म दुर्दर्शं विबुधैरपि ।
परिचिन्वन्तु सुधियो भक्ताश्चन्द्रिकयानया ॥ ८ ॥

इति महामहोपाध्यायश्रीमद्विश्वनाथचक्रवर्तिमहाशयविरचिता
रागवर्त्मचन्द्रिका समाप्ता ॥

हे गोकुलानन्द ! हे लीलाविलासी ! भक्तिमञ्जरीमकरन्द के लोलुप मधुकर ! मौग्ध्य-सार्व्वज्ञनिधि आपको नमस्कार है। हे प्रभो ! आपने अपने मुख से कहा है—"मैं अपने भक्तों को तादृश बुद्धियोग प्रदान करता हूँ जिस से वे मुझको प्राप्त करते हैं" अतः हे गोपेन्द्रनन्दन ! मैं प्रार्थना करता हूँ कि—गोपीकुचों से अलंकृत तुम्हारा दास्य लाभ हो हमें उस प्रकार की बुद्धि दीजिये ।" जो सब कहते हैं—"रागानुगाभक्ति सब समय सर्वप्रकार से शास्त्र-विधि का अतिक्रम करती है" वे सब 'जो शास्त्रविधि का उलंघन करके श्रद्धा के साथ अर्च्चना करता है" तथा "विधिहीन, अदत्त अन्न इत्यादि ग्रहण करते हैं इन गीतावचनानुसार निन्दनीय हैं। वे तीनों कालों में विघ्नों के द्वारा उपद्रुत होते हैं। इस विषय में अधिक बोलना निष्प्रयोजन है । अहो ! रागानुगामार्ग अत्यन्त दुर्दर्श है। देवताओं के भी महान् अगोचर है । भक्तसुधीगण इस रागवर्त्मचन्द्रिका की सहायता से इस मार्ग का परिचय करें ॥ ८ ॥

लोक साहित्य प्रेस, मथुरा ।

उज्वलनीलमणिकिरणः ।

अथोज्ज्वलरसस्तत्र नायकचूड़ामणिः श्रीकृष्णः । प्रथमं गोकुलमथुराद्वारकासु क्रमेण पूर्णतमः पूर्णतरः पूर्ण इति त्रिविधः । धीरोदात्तः धीरललितः धीरोद्धतः धीरशान्त इति प्रत्येकं चतुर्विधः तत्र रघुनाथवत् गम्भीरो विनयी यथार्ह सर्व्वजनसन्मानकारीत्यादिगुणवान् धीरोदात्तः । कन्दर्पवत् प्रेयसीवशो निश्चिन्तो नवतारुण्यो विदग्धो धीरललितः । भीमसेनवत् उद्धत आत्मश्लाघारोषकैतवादिगुणयुक्तो धीरोद्धतः । युधिष्ठिरवत् धार्मिको जितेन्द्रियः शास्त्रदर्शी धीरशान्तः । पुनश्च पत्युपपतित्वेन प्रत्येकं स द्विविधः । एवं पुनश्च अनुकूलो दक्षिणः शठो धृष्ट इति प्रत्येकं चतुर्विधः एकस्यामेव नायिकायामनुरागी अनुकूलः, सर्वत्र समो दक्षिणः, साक्षात् प्रियं वक्ति परोक्षे अप्रियं करोति यः स शठः, अन्यकान्तासम्भोगचिह्नादियुक्तोऽपि निर्भयः मिथ्यावादी यः धृष्टः । एवं षड् नवतिविधा नायकभेदाः ॥ १ ॥

अथाश्रयालम्बननायिकाः प्रथमं स्वीयाः परकीया इति द्विविधाः कात्यायनीव्रतपराणां कन्यानां मध्ये या गान्धर्व्वेण विवाहिताः ताः स्वीयाः तदन्या धन्यादयः कन्याः परकीया एव । श्रीराधाद्यास्तु प्रौढाः परकीया एव । कियन्त्यः गोकुले स्वीया अपि पित्रादिशङ्कया परकीया एव । द्वारकायां रुक्मिण्याद्याः स्वीया एव ततश्च मुग्धा मध्या प्रगल्भा इति त्रिविधाः । मध्या मानसमये धीरामध्या अधीरामध्या धीराधीरामध्या इति त्रिविधाः । वक्रोक्तिपवित्रभर्त्सनकारिणी या सा धीरामध्या । मिश्रितवाक्या या सा धीराधीरामध्या श्रीराधा । तत्र प्रगल्भापि धीरप्रगल्भा

अधीरप्रगल्भा धीराधीरप्रगल्भा चेति त्रिविधा । तत्र निजरोष-गोपनपरा सुरते उदासीना या सा धीरप्रगल्भा पालिका चन्द्रावली भद्रा च । निष्ठुरतर्जनेन कर्णोत्पलेन पद्मेन या कृष्णं ताडयति सा अधीरप्रगल्भा श्यामला । रोषसंगोपनं कृत्वा किञ्चित्तर्जनं करोति या सा धीराधीरप्रगल्भा मङ्गला मुग्धातिरोषेण मौनमात्रपरा एक विधैव । एवं त्रिविधा मध्या प्रगल्भा त्रिविधा मुग्धा एकविधा इति सप्तधा । स्वीया-परकीया भेदेन चतुर्दशविधा । कन्या च मुग्धैवैकविधा इति पञ्चदशविधा नायिका भवन्ति इति । अथाष्टनायिकाः—अभिसारिका, वासकसज्जा, विरहोत्कण्ठिता, विप्रलब्धा, खण्डिता, कलहान्तरिता, प्रोषितभर्तृका स्वाधीन-भर्तृका । अभिसारयति कृष्णं स्वयं वाभिसरति या साभिसारिका । कुञ्जमन्दिरे सुरतशय्यासन माल्यताम्बूलादिकं मदनोत्सुका करोति या सा वासकसज्जा । कृष्णविलम्बे सति तेन विरहेणोत्कण्ठयते या सा विरहोत्कण्ठिता । यदि यात्येव कृष्णस्तदा विप्रलब्धा । प्रातरागतम् अन्यकान्तासम्भोगचिह्नयुक्तं कृष्णं रोषेण पश्यति या सा खण्डिता । मानान्ते पश्चात्ताप करोति या सा कलहान्तरिता । कृष्णस्य मथुरागमने सति या दुःखार्त्ता सा प्रोषितभर्तृका । सुरतान्ते वेशाद्यर्थं या कृष्णं ज्ञापयति सा स्वाधीनभर्तृका एवं पञ्चदशानामष्टगुणत्वेन विंशत्युत्तरशतानि । पुनश्चोत्तममध्यम-कनिष्ठत्वेन षष्ट्युत्तराणि त्रीणि शतानि नायिकाभेदानां तासां व्रजसुन्दरीणां मध्ये काश्चिन्नित्यसिद्धाः श्रीराधाचन्द्रावल्यादयः । काश्चित् साधनसिद्धाः । तत्र काश्चित् मुनिपूर्वाः काश्चित् श्रुति-पूर्वाः काश्चित् दव्य इति ज्ञेयाः ॥ २ ॥

अथ स्वभावाः । काश्चित् प्रखराः श्यामलामङ्गलादयः । काश्चिन्मध्या श्रीराधिकापालिप्रभृतयः । काश्चिन्मृद्वीति ख्याता-श्चन्द्रावल्यादयः । अथ स्वपक्षः सुहृत्पक्षः तटस्थपक्षा विपक्ष इति

भेदचतुष्टयं स्यात् । तत्रापि काश्चिद्वामाः काश्चिद् दक्षिणाश्च । श्रीराधायाः स्वपक्षः ललिताविशाखादिः सुहृत्पक्षः श्यामला यूथेश्वरी तटस्थपक्षः भद्रा प्रतिपक्षश्चन्द्रावली । तत्र काश्चिद्वामाः काश्चिद्दक्षिणाः स्युः । श्रीमती राधिका वामा मध्या नीलवस्त्रा रक्तवस्त्रा च । ललिता प्रखरा शिखिपिञ्छवसना । विशाखा वामा मध्या तारावलिवसना । इन्दुरेखा वामा प्रखरा अरुणवस्त्रा । रङ्गदेवीसुदेव्यौ वामे प्रखरे रक्तवस्त्रे च । सर्व्वा एव गौरवर्णाः । चम्पकलता वामा मध्या नीलवस्त्रा चित्रा दक्षिणा मृद्वी नीलवसना । तुङ्गविद्या दक्षिणा प्रखरा शुक्लवस्त्रा च । श्यामला वाम्यदाक्षिण्ययुक्ता प्रखरा रक्तवस्त्रा । भद्रा दक्षिणा मृद्वी चित्रवसना चन्द्रावली दक्षिणा मृद्वी नीलवस्त्रा, अस्याः सखी पद्मा दक्षिणा प्रखरा शैव्या दक्षिणा मृद्वी । सर्वा एव रक्तवस्त्राः ॥ ३ ॥

अथ दूती द्विविधा स्वयं दूती आप्तदूती च तत्राप्तदूती च त्रिविधा अमितार्था निसृष्टार्था पत्रहारिणी च । वाक्य विना इङ्गितेनैव या दौत्यं करोति सा अमितार्था, या आज्ञया समस्तं कार्यं करोति भारं वहति च सा निसृष्टार्था, या पत्रेण कार्यं करोति साधयति च सा पत्रहारिणी ताः शिल्पकारिणी दैवज्ञा लिङ्गिनी परिचारिका धात्रेयी वनदेवी सखी चेत्यादयः । व्रजे वीरा वृन्दा वंशी च कृष्णस्य दूतीत्रयम् प्रगल्भवचना वीरा वृन्दा च प्रियवादिनी सर्वकार्यसाधिका वंशी ॥ ४ ॥

अथ सखी पञ्चविधा सखी नित्यसखी प्राणसखी प्रियसखी परमप्रेष्ठासखी एषां मध्ये काचित् समस्नेहा काचिदसमस्नेहा या कृष्णे स्नेहाधिका सा सखी वृन्दा कुन्दलता विद्या धनिष्ठाकुसुमिका तथा कामदा नामात्रेयी सखीभावविशेषभाक् । या राधिकायां स्नेहाधिका सा नित्यसखी नित्यसख्यस्तु कस्तूरी

मनोज्ञा मणिमञ्जरी-सिन्दूरा चन्दनवती-कौमुदी-मदिरादयः । तत्र मुख्या या सखी स्नेहाधिका सा प्राणसखी उक्ता जीवितसख्यस्तु तुलसी केलीकन्दली कादम्बरी शशिमुखी चन्द्ररेखा प्रियम्वदा मदोन्मदा मधुमती वासन्ती कलभाषिणी रत्नावली मालती कर्पूरलतिकादयः । एता वृन्दावनेश्वर्य्या प्रायः सारूप्यमागताः । मालती चन्द्रलतिका गुणचूडा वराङ्गदा माधवी चन्द्रिका प्रेममञ्जरी तनुमध्यमा कन्दर्पसुन्दरीत्याद्याः कोटिसङ्ख्या मृगीदृशः प्रियसख्यः । तत्र मुख्या या सा परमप्रेष्ठसखी ललिता च विशाखा च चित्रा चम्पकवल्लिका रङ्गदेवी सुदेवी च तुङ्गविद्येन्दुरेखिका यद्यप्येताः समस्नेहास्तथापि श्रीराधायां पक्षपातं कुर्वन्ति ॥ ५ ॥

अथ वयः । वयःसन्धिः नव्ययौवनं व्यक्तयौवनं पूर्णयौवनं चेति कलावत्यादयो वयःसन्धौ स्थिताः । धन्यादयो नव्ययौवने स्थिताः श्रीराधादयस्तु व्यक्तयौवने स्थिताः चन्द्रावल्यादयः पूर्णयौवने स्थिताः पद्माद्याः पूर्ण यौवने स्थिता इत्यालम्बनविभावः ॥ ६ ॥

अथोद्दीपनविभावः गुणनामताण्डववेणुवाद्यगोदोहनविभूषणगीतचरणचिह्नाङ्गसौरभ्यनिर्माल्यबर्हगुञ्जावतंसकृष्णमेघचन्द्रदर्शनादिभेदाद्बहुविधः ॥ ७ ॥

अथानुभावाः भावः हावः हेला शोभा कान्तिः दीप्तिर्माधुर्य्यं प्रगल्भता औदार्य्यं धैर्य्यं लीला विलासो विच्छित्तिर्विभ्रमः किलकिञ्चितं मोट्टायितं कुट्टमितं विव्वोकं ललितं विकृतमिति विंशत्यलंकाराः तत्र निर्विकारात्मके चित्ते भावः प्रथमविक्रिया । तीर्यग्ग्रीवाभ्रूनेत्रादिविकाशसूच्यो हावः कुचस्फुरणपुलकादिनीविवासस्खलनादिसूच्या हेला रूपभोगाद्यैरङ्गविभूषणं शोभा शोभैव यौवनोद्रेके कान्तिः कान्तिरेव देशकालादिविशिष्टा दीप्तिः नृत्यादिश्रमजनितगात्रशैथिल्यं माधुर्यं सम्भोगवैपरीत्यं प्रगल्भता ।

रोषेऽपि नयनव्यञ्जनमौदार्य्यम् । दुःखसम्भावनायामपि प्रेम्णि निष्ठा धैर्य्यम् । कान्तचेष्टानुकरणं लीला । प्रियसङ्गे सति मुखादीनां तात्कालिकप्रफुल्लता विलासः । अल्पमात्राकल्पधारणेऽपि शोभा विच्छित्तिः । अभिसारादावतिसम्भ्रमेण हारमाल्यादिस्थानविपर्य्ययो विभ्रमः । श्रीराधाकृष्णयोर्वर्त्मरोधनादौ गर्वाभिलाष-रुदित-स्मितासूया-भयक्रुधासङ्करीकरणं हर्षादुच्यते किल किञ्चितम । कान्तवार्त्ताश्रवणे पुलकादिभिरभिलाषस्य प्राकट्यं मोट्टायितं । अधरखण्डनस्तनाकर्षणादौ आनन्देऽपि व्यथाप्रकटनं कुट्टमितं । वाञ्छितेऽपि वस्तुनि गर्वेणादरो बिव्वोकः । भ्रूभंग्या अङ्गभंग्या च हस्तेन च भ्रमरविद्रावणादिचेष्टितं ललितम् । लज्जादिभिर्यत् निजकार्यं नोच्यते किन्तु चेष्टया व्यज्यते तत् विकृतम् । इति विंशत्यलङ्कारा: । ज्ञातस्याप्यज्ञवत् प्रश्ने मौग्ध्यम् । प्रियस्याग्रे भ्रमरादिकं दृष्ट्वा भयं चकितम् । इति द्वयमधिकम् ॥ ८ ॥

अथान्ये अनुभावा: नीव्युत्तरीयधम्मिल्लस्रंसनं गात्रमोटनं जृम्भा घ्राणस्य फुल्लत्वं निःश्वासाद्याश्च ते मताः ॥ ९ ॥

अथ सात्त्विकाः । स्वेदस्तम्भादयोऽष्ट धूमायित-ज्वलित-दीप्त-सूदीप्ताः ॥ १० ॥

अथ व्यभिचारिणः । निर्वेदविषादाद्या भावाः ॥ ११ ॥

तत्र भावोत्पत्तिः भावसन्धिः भावशावल्यम् भावशान्तिरिति दशाचतुष्टयम् । भावोत्पत्तिः स्पष्टार्था, भावद्वयस्य मिलनं भावसन्धिः, पूर्वपूर्वभावस्य यः परपरभावेनोपमर्द्दः स एव भावशावल्यं, भावशान्तिर्भावस्यान्तर्धानमेव ॥ १२ ॥

अथ स्थायीभावः, मधुरा रतिः सा च त्रिविधा, साधारणी समञ्जसा समर्था इति । कुब्जायां साधारणी साधारणमणिवत् पट्टमहिषीषु समञ्जसा चिन्तामणिवत् व्रजदेवीषु समर्था कौस्तुभ-

मणिवत् । सामान्यभावेन स्वसुखतात्पर्यरतिः साधारणी । कृष्णस्य निजस्य च सुखतात्पर्यरतिः पत्नीभावमयी समञ्जसा । केवलकृष्ण-सुखतात्पर्यरतिः पराङ्गनामयी समर्था ॥ १३ ॥

अथ समर्था प्रथमदशायां रतिर्बीजवत् प्रेमा इक्षुवत् स्नेहो-रसवत् ततो मानं गुडवत्, ततः प्रणयः खण्डवत्, ततो रागः शर्करावत्, ततोऽनुरागः सितावत् ततो महाभावः सितोपलवत् । अथ प्रेमा । तत्र पूर्वसंस्कारतो वा श्रवणदर्शनादिभ्यो वा कृष्णे प्रीत्या मनोलग्नता रतिः । विघ्नसम्भवेऽपि ह्रासाभावः प्रेमा । चित्तस्य द्रवीभावनिदानं स्नेहः । तत्र चन्द्रावल्यादौ तदीयता-भावेन घृतस्नेहश्च आदरमयो भावान्तरमिश्रित एव सुरसो यथा घृतम । श्रीराधादौ मदीयताभावेन मधुस्नेह आदरशून्यः स्वत एव सुरसो यथा मधु । अथ मानः—स्नेहाधिक्येन भद्राभद्रहेतुना वा रोषेण वा हेतुना विनैव वा कौटिल्यं मानः । चन्द्रावल्यादौ दाक्षिण्योदात्तः क्वचिद्वाम्यगन्धोदात्तः । श्रीराधादौ तु ललितः । अथ प्रणयः—मनोदेहेन्द्रियैरैक्यभावनामयो विश्रम्भः प्रणयः, सख्यं मैत्र्यञ्च । अथ रागः—चन्द्रावल्यादौ नीलरागः स्वलग्न-भावावरणः । तत्रैव श्यामरागोऽपि प्रायो भद्रादौ चिरसाध्यरूपः श्रीराधादौ तु मञ्जिष्ठारागोऽनन्यापेक्षो भावावरणशून्यः । तथैव श्यामलादौ कुसुम्भरागः सुखसाध्यत्वात् किंचिदन्यापेक्षः ॥ पात्र-साद्गुण्यात् स्थितिः । अथानुरागः श्रीकृष्णः सदानुभूयते अथ च नवनवापूर्व इव बुद्धिर्यतो भवति सः अनुरागः । तत्र चाप्राणि-न्यपि जन्मलालसा प्रेमवैचित्त्यं विच्छेदेऽपि स्फूर्त्तिरित्यादि-क्रियाः । अथ महाभावः, स एव रूढः अधिरूढ इति द्विविधः । कृष्णस्य सुखे पीडाशङ्कया निमिषस्यापि असहिष्णुततादिकं यत्र स रूढो महाभावः । कोटिब्रह्माण्डगतं समस्तसुखं यस्य सुखस्य लेशोऽपि न भवति समस्तवृश्चिकसर्पादिदंशकृतदुःखमपि यस्य-

दुःखस्य लेशो न भवति । एवम्भूते कृष्णसंयोगवियोगयोः सुखदुःखे यतो भवतः सोऽधिरूढो महाभावः । अधिरूढस्यैव मोदनो मादन इति द्वौ रूपौ भवतः । यस्य उदये कृष्णस्य तत्प्रेयसीनां महाक्षोभश्चमत्कारो भवेत् सुदीप्तसात्त्विकविकारदर्शनात् स मोदनः । सतु राधिकायूथ एव भवति नान्यत्र । मोदनोऽयं प्रविश्लेषदशायां मादनो भवेत् यस्य उदये सति पट्टमहिषीगणालिङ्गितस्यापि श्रीकृष्णस्य मूर्च्छा भवति राधाविरहतापेन, ब्रह्माण्डक्षोभकारित्वं तिरश्चामपि रोदनञ्च । प्रायो वृन्दावनेश्वर्य्यां मादनोऽयमुदञ्चति । मादनस्य एव वृत्तिभेदो दिव्योन्मादः यत्र उद्घूर्णा चित्रजल्पादयः प्रेमभय्यो ऽवस्थाः सन्ति । यत्रानन्तभावोद्गमः । वनमालायामपि ईर्षा पुलिन्देष्वपि श्लाघा तमालस्पर्शिन्या मालत्या भाग्यवर्णनञ्च । एष मादनः सर्वश्रेष्ठः श्रीराधायामेव नान्यत्र ।। १४ ।।

अथैषामाश्रयनिर्णयः-कुब्जायां साधारणी रतिः प्रेमपर्य्यन्ता पट्टमहिषीषु समञ्जसा रतिः अनुरागपर्य्यन्ताः तत्र सत्यभामा राधिकानुसारिणी लक्ष्मणा च । रुक्मिणी तु चन्द्रावलीभावानुसारिणी अन्याश्च । व्रजस्थप्रियनर्म्मसखानां च अनुरागपर्य्यन्ता । व्रजसुन्दरीणां तु समर्थारतिः महाभावपर्य्यन्ता, सुबलादीनाञ्च । तत्रापि राधिकायूथ एव नान्यत्र । तत्रापि मादनः श्रीराधायामेव ललिताविशाखयोरपि ।। १५ ।।

स्थायीभावः । स एव विप्रलम्भः सम्भोगश्चेति द्विविधः । तत्र विप्रलम्भश्चतुर्विधः पूर्व्वराग, मानः प्रेमवैचित्त्यं प्रवासश्च । अङ्गसङ्गात् पूर्वं या उत्कण्ठामयी रतिः सः पूर्वरागः तत्र दशदशा "लालसोद्वेगजागर्या तानवं जडिमांगता । वैयग्र्यं व्याधिरुन्मान्दो मोहो मृत्यु र्दशा दश" । मानः द्विविधः सहेतुर्निर्हेतुश्च तत्र निर्हेतुकः स्वयमेव शाम्यति सहेतुकस्य मानस्य शान्तिः सामभेदक्रियादान-

नत्युपेक्षारसान्तरैः। प्रियवाक्यं साम। निजैश्वर्य्यं श्रावयित्वा तस्या अयोग्यत्वज्ञापनं भेदः! वयस्यादिद्वारा भयप्रदर्शनञ्च क्रिया। वस्त्रमाल्यादीनां प्रदानं दानम्। नतिर्नमस्कारः। उपेक्षा औदासीन्यप्रकटनम्। रसान्तरं भयकष्टादिप्रदानादिप्रस्तावः। मानशान्तिचिन्हानि अश्रुस्मितादयः। अथ प्रेमवैचित्त्यम कृष्ण-निकटेऽपि अनुरागाधिक्याद्विरहो यत्र भवति तदेवतत् अथ प्रवासः स द्विविधः किञ्चिद्दूरनिष्ठः सुदूरनिष्ठश्च नित्यमेव गोचारणाद्य-नुरोधात् किञ्चिद्दूरे मथुरां गते सति सुदूरे। तत्र च दश दशा अतिप्रबला भवन्ति। अथ सम्भोगः स च चतुर्विधः पूर्वरागान्ते चाधरनखक्षतादीनाम अल्पत्वे संक्षिप्तो, मानान्ते असूयामात्स-र्य्यादिदोषाभाससंमिश्रितः सङ्कीर्णः, किञ्चिद्दूरप्रवासान्ते सम्पन्नः स्पष्टः। सुदूरप्रवासान्ते समृद्धिमान् अतिस्पष्टः। अथ सम्भोगप्रपञ्चः दर्शन-स्पर्शन-कथन-वर्त्मरोध-वनविहार-जलकेलि-वंशीचौर्य्य-नौका-खेला-दानलीला-लुक्कायनलीला-मधुपानादयः अनन्ता एव ॥ १६ ॥

अनधीतव्याकरणश्चरणप्रवणो हरेर्जनो यः स्यात्।
उज्ज्वलनीलमणिकिरणस्तदालोकाय भवतु ॥

इतिमहामहोपाध्यायश्रीविश्वनाथचक्रवर्त्ति-
विरचितः उज्ज्वलनीलमणिकिरणः

समाप्तः ॥

———

* श्री राधाबल्लभो जयति *

लिखितं श्रृंगारचूड़ामणिग्रंथम्

शीतल कल कलि ताप हर उज्वल जोति प्रकास ।
श्रीहरिवंश चंद मेरें सदा रहौ हिये आकास ॥
चित्तभूमि अभिलाष बहु अमित औषधी रूप ।
रस अमृत करुना किरन सींचहु प्रेम अनूप ॥
कारन को कारन जु है सर्वेश्वर कमनीय ।
अनंत प्रकाश अचिंत गति नित बिलास रमनीय ॥
दुर्गम गति योगींद्र हूँ ब्रह्म रुद्र रिषि आन ।
ताकौ रस तिहिं कृपा तें बरनौं मति अनुमान ॥
सो नंदनंदन कृष्ण तिन प्रिया राधिका जान ।
अखिल रसनि मय लसत नित उज्वल रस परिधान ॥
जे व्याकरन पढे नहीं कृष्ण चरन मन दीन ।
रसास्वाद चाहत कियौ श्रद्धा शुद्ध प्रवीन ॥
गौर नील छवि में रंगे मननि शील रस वेद ।
तिन हित बिवरन कछुक यह उज्वल रस कौ भेद ॥
सबै सच्चिदानंद मय लीलारस बहु भाइ ।
नित्य एक रस नवल कल नव नव भाइ लसाई ॥
प्रथमहि आलंबन सु द्वै विषै आश्रय नाम ।
सो हैं नायक नायिका कृष्ण राधिका वाम ॥ ९ ॥
विषयालंबन बरनियत रचि रुचि मधुरे बैंन ।
नायक चूडामणि अहो कृष्ण मनोहर मैंन ॥ १० ॥

